## द्वादशः पाठः



# कः रक्षति कः रक्षितः

[प्रस्तुत पाठ पर्यावरण पर केन्द्रित है। हमारे जीवन में प्लास्टिक का इस सीमा तक प्रवेश हो चुका है कि हम इसके बिना दैनिक जीवन चलाने की कल्पना भी नहीं कर पाते जबकि प्लास्टिक पर्यावरण के लिए घातक है। प्लास्टिक के बढ़ते हुए उपयोग पर प्रश्नचिह्न लगाते हुए इस पाठ में पर्यावरण तथा प्रदूषण की समस्या के प्रति संवेदनशील समझ विकसित करने का प्रयास किया गया है।]

*(काश्चन बालिकाः भ्रमणाय निर्गताः परस्परमालपन्ति)*

**रिपञ्ची** – परमिन्दर्! परमिन्दर्! एहि आगच्छ, उपवनं प्रविशामः।

**परमिन्दर्** – अरे! उपवनस्य द्वारे एव प्लास्टिकस्यूतकानि क्षिप्तानि इतस्ततः विकीर्णानि।



© NCERT not to be republished

**कचनार्** – जनाः प्रमादं कुर्वन्ति। प्लास्टिकपुटकेषु खाद्यवस्तूनि गृहीत्वा भक्षयन्ति, परं तानि पुटकानि मार्गे यत्र कुत्रापि क्षिपन्ति।

**रोजलिन्** – महती इयं समस्या। अपि प्रविशामः?

**रिपञ्ची** – अस्तु प्रविशामः।

(*सर्वाः उपवने प्रविशन्ति।*)

**कचनार्** – कुत्र उपविशामः?

**रिपञ्ची** – अस्मिन् काष्ठपीठे उपविशामः।

(*सर्वाः उपविशन्ति*)



**रिपञ्ची** – अपि पश्यथ, वयं यत्रोपविष्टाः तत्र कानि वस्तूनि सन्ति?

**परमिन्दर्** – आम्। आम्। बहूनि वस्तूनि परितो विकीर्णानि।

**कचनार्** – यथा स्यूतः, जलकूपी, कन्दुकम् इत्यादीनि।

कः रक्षति
कः रक्षितः

© NCERT not to be republished

**रोजलिन्** – हला, आत्मानमपि पश्य।

**चेनम्मा** – आम्। आम्। पश्यामि एव। मम सविधे कङ्कतम्, कुण्डलम्, केशबन्धः, घटिपट्टिका, कङ्कणम् इत्यादीनि सर्वाणि विराजन्ते। किमसि वक्तुकामा?

**रिपञ्ची** – इदं ध्यातव्यं यद् एतानि सर्वाणि वस्तूनि प्रायः प्लास्टिकेन निर्मितानि सन्ति।

**कचनार्** – पूर्वं तु प्रायः कार्पासेन, चर्मणा, लौहेन, लाक्षया, मृत्तिकया काष्ठेन वा निर्मितानि वस्तूनि एव प्राप्यन्ते स्म। अधुना तत् स्थाने प्लास्टिक-निर्मितानि वस्तूनि परितः विकीर्णानि सन्ति। एतानि अल्पमूल्यानि अपि सन्ति।

**चेनम्मा** – अहो! कलमस्तु विस्मृतः। कोऽपि एतत् अनुमातुं शक्नोति यत् एकस्मिन् कलमे कति मसियष्टयः प्रयुज्यन्ते।

**परमिन्दर्** – अनुमीयते यत् प्रत्येकं छात्रा प्रतिसप्ताहं स्वकलमे एकां मसियष्टिं पूरयति। तात्पर्यम् इदमस्ति यत् एकस्मिन्नेव वर्षे न्यूनान्न्यूनं प्रायः पञ्चाशत् मसियष्टयः तया प्रयुक्ताः भवन्ति।

**चेनम्मा** – परं किं वयम् एकस्मिन् वर्षे एकस्यैव कलमस्य प्रयोगं कुर्मः?

**सामूहिकस्वरः** – नहि नहि। वर्षे तु प्रायशः बहवः कलमाः विलुप्यन्ते।

**रिपञ्ची** – एका छात्रा त्रिषु मासेषु एकं कलमं क्रीणाति। अर्थात् एकस्मिन् वर्षे चतुरः कलमान् क्रीणाति।

**रोजलिन्** – अपरं च कलमेन सह मसियष्टिः अपि प्लास्टिकावरणे समावेश्यते। तर्हि आहत्य प्रतिवर्षम् एका छात्रा प्रायः पञ्चाशन्मसियष्टीनां चतुर्भिः कलमैः चतुःपञ्चाशद्भिः आवरणैः प्रयोगं करोति।



© NCERT not to be republished

| | | |
|---|---|---|
| कचनार् | – | भवतु, बहुधा प्रयुक्तस्य प्लास्टिकस्य दूरगामिनः घातकान् परिणामान् वयं न द्रष्टुं शक्नुमः। प्लास्टिकं कदापि न गलति, न च अपक्षीयते। यथा–अन्यानि वस्तूनि विनश्य मृत्तिकायां विलीयन्ते। |
| चेनम्मा | – | प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति। |
| रिपञ्ची | – | एकेन पदार्थेन अपरः पदार्थः सृज्यते, अथवा विनष्टं वस्तु मृत्तिकायां मिलति। परं प्लास्टिके इयं प्रक्रिया असम्भवा एव। |
| परमिन्दर् | – | कल्पयतु, यदि शतं वर्षाणि यावत् प्लास्टिक-निर्मितानां पदार्थानां निर्माणप्रक्रिया पृथिव्यां प्रचलिष्यति तर्हि किं स्यात्? (*सर्वाः सखेदं विमृशन्ति।*) |
| रोजलिन् | – | अत्र विषादेन किम्? सर्वप्रथमं तु शिक्षकाणां सहयोगेन प्लास्टिकस्य विविधपक्षाः विचारणीयाः। अस्माकं प्रयासोऽपि पर्यावरणस्य रक्षणे अपेक्षितः। |




| | | |
|---|---|---|
| **काश्चन (काः+चन)** | – | कुछ |
| **चर्चयन्ति** | – | चर्चा करते हैं |
| **पुटकेषु** | – | छोटी थैली (पाउच) |
| **स्यूतः** | – | थैला/थैली |
| **जलकूपी** | – | पानी की बोतल |
| **हला** | – | सखी के लिए सम्बोधन |




© NCERT not to be republished

| | | |
|---|---|---|
| **कङ्कतम्** | – | कंघा/कंघी |
| **कङ्कणम्** | – | कंगन |
| **कार्पासेन** | – | कपास से |
| **लाक्षया** | – | लाख से |
| **मृत्तिकया** | – | मिट्टी से |
| **विकीर्णानि** | – | बिखरी हुई/फैली हुई |
| **प्रमादम्** | – | आलस्य |
| **काष्ठपीठे** | – | लकड़ी की बैंच पर |
| **आहत्य** | – | कुल मिलाकर |
| **मसियष्ट्या** | – | रिफिल से |
| **न्यूनान्न्यूनम्** (न्यूनात्+न्यूनम्) | – | कम से कम |
| **प्रायशः** | – | प्रायः, लगभग |
| **विलुप्यन्ते** | – | लुप्त हो जाते हैं |
| **अपक्षीयते** | – | नष्ट हो जाता है |
| **विलीयन्ते** | – | विलीन हो जाते हैं |
| **लयाभावात्** (लय+अभावात्) | – | लीन/नष्ट न होने के कारण |
| **सृज्यते** | – | निर्मित किया जाता है |
| **कल्पयतु** | – | कल्पना कीजिए |
| **विमृशन्ति** | – | विचार करते हैं |

## अभ्यासः



**1. उच्चारणं कुरुत–**

| | | | | |
|---|---|---|---|---|
| पञ्चाशत् | षष्टिः | सप्ततिः | अशीतिः | नवतिः |
| त्रिपञ्चाशत् | द्वाषष्टिः | चतुस्सप्ततिः | द्व्यशीतिः | त्रिनवतिः |
| पञ्चपञ्चाशत् | चतुष्षष्टिः | पञ्चसप्ततिः | चतुरशीतिः | पञ्चनवतिः |
| सप्तपञ्चाशत् | पञ्चषष्टिः | सप्तसप्ततिः | पञ्चाशीतिः | षण्णवतिः |
| अष्टापञ्चाशत् | नवषष्टिः | अष्टासप्ततिः | नवाशीतिः | शतम् |

**2. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत–**

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | भ्रमणाय | चतुर्थी | एकवचनम् |
| | वस्तूनि | ............... | ............... |
| | प्लास्टिकेन | ............... | ............... |
| | विकीर्णानि | ............... | ............... |
| | मसियष्ट्या | ............... | ............... |
| | स्यूतकेषु | ............... | ............... |
| | काष्ठपीठे | ............... | ............... |
| | पृथिव्याम् | ............... | ............... |

**3. एकपदेन उत्तरत–**

(क) मसियष्टी–जलकूपी–प्रभृतिनि वस्तूनि केन पदार्थेन निर्मितानि?

(ख) उपवनस्य द्वारे कानि क्षिप्तानि सन्ति?

(ग) मृत्तिकायां किं वस्तु न कदापि विनश्यति?

(घ) अस्माकं प्रयासः कस्य रक्षणे अपेक्षितः?






© NCERT not to be republished

**4. प्रश्नानाम् उत्तराणि लिखत–**

(क) चेनम्मायाः सविधे कानि वस्तूनि आसन्?

(ख) पूर्वं प्रायः केन पदार्थेन निर्मितानि वस्तूनि प्राप्यन्ते स्म?

(ग) कानि कानि वस्तूनि पर्यावरणं दूषयन्ति?

(घ) प्लास्टिकस्य मृत्तिकायां लयाभावात् किं भवति?

**5. अधोलिखितानां पदानां लकारं पुरुषं वचनञ्च लिखत–**

| | पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | सन्ति | अस् | लट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| | कुर्मः | ............ | ............ | ............ | ............ |
| | क्रीणाति | ............ | ............ | ............ | ............ |
| | पश्य | ............ | ............ | ............ | ............ |
| | आगच्छ | ............ | ............ | ............ | ............ |
| | प्रचलिष्यति | ............ | ............ | ............ | ............ |

**6. मञ्जूषातः अङ्कानां कृते पदानि चिनुत–**

| | | | |
|---|---|---|---|
| चतुःपञ्चाशत् | सप्तषष्टिः | द्वासप्ततिः | षडशीतिः |
| चतुर्नवतिः | सप्तनवतिः | पञ्चसप्ततिः | अष्टानवतिः |

67 .....................   86 .....................

98 .....................   97 .....................

54 .....................   72 .....................

94 .....................   75 .....................

© NCERT not to be republished

## योग्यता-विस्तारः

संस्कृत में अकारान्त स्त्रीलिङ्ग शब्द के रूप प्राप्त नहीं होते हैं। लेकिन लड़कियों के अकारान्त नाम होते हैं। इनके उदाहरण हैं–परमिन्दर, रोजलिन, कचनार आदि। यहाँ प्रश्न उठता है कि किस रूप में इन नामों को संस्कृत में लिखा जाए। इसलिये इस पाठ में व्यञ्जनान्त (परमिन्दर्) रूप में रखा गया है। संस्कृत में इन्हें व्यञ्जनान्त (परमिन्दर्, रोजलिन्, कचनार्) मानकर रूप चलाये जाने चाहिए।

## परियोजना-कार्यम्

चलिए, आगामी अवकाश में एक अभ्यास करते हैं। सुबह जगने से लेकर रात सोने के समय तक बाजार से आनेवाली और प्रतिदिन काम में आने वाली वस्तुओं को ध्यानपूर्वक देखें और इनकी एक सूची बनाएँ। उनके लिए संस्कृत में क्या प्रयोग होता है यह जानने का प्रयास करें। सूची में हर वस्तु के नाम के आगे यह लिखें कि वह किस चीज़ की बनी है। इसमें प्लास्टिक की बनी हुई चीज़ों को छाँटकर एक जगह लिखें और यह आकलन करने का प्रयत्न करें कि प्रतिदिन हम कितनी मात्रा में प्लास्टिक का उपयोग करते हैं।

संस्कृत में वाक्य में पहले 'अपि' लगाने से वाक्य प्रश्न वाचक हो जाता है। जैसे–अपि प्रविशामः? क्या हम भीतर चलें?

धातु-संयुक्त तुमुन् प्रत्यय के अनुस्वार का लोप करके उसके आगे कामा/कामः जोड़ने से अमुक कार्य करना चाहने वाली/चाहने वाला–यह मुहावरेदार प्रयोग होता है। जैसे–गन्तुकामा, वक्तुकामा, कर्तुकामः इत्यादि। इस प्रक्रिया के आधार पर नीचे लिखे वाक्यों का संस्कृत में अनुवाद करें–

(क) राम क्या कहना चाहता है?

(ख) क्रिस्तीना कहाँ जाना चाहती है?

(ग) वह करना क्या चाहता है?

कः रक्षति
कः रक्षितः

© NCERT not to be republished